## U.G. 6th Semester Examination - 2023

# SANSKRIT

## [HONOURS]

### Course Code : SANS-H-CC-T-13

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. Answer any **ten** questions in Sanskrit Language with Devanāgari Script: 10×2=20

निम्नोक्तेषु **दश** प्रश्नान् सुरगिरा देवनागरीलिप्या च समाधेहि :

क) आस्तिकशब्दस्य का व्युत्पत्तिः? कानि तावद् आस्तिकदर्शनानि?

ख) वस्तुवादस्य विषयः कः? आरम्भवादं के स्वीकुर्वन्ति?

ग) भारतीयदर्शने के तावत् एकात्मवादिनः? के च विवर्तवादिनः?

घ) अद्वैतवादं के स्वीकुर्वन्ति? अद्वैतशब्दस्य कोऽर्थः?

ङ) देहात्मवादशब्दस्य कोऽर्थः? भारतीयदर्शने के तावत् देहात्मवादिनः?

च) भारतीयदर्शने सत्कार्यवादं के स्वीकुर्वन्ति?

छ) भारतीयदर्शनशास्त्रे नास्तिकशब्दस्य कोऽर्थः? एकस्यास्तिकदर्शनस्य नाम लेखनीयं येन ईश्वरः अस्वीकृतः।

ज) तर्कसंग्रहदिशा द्रव्यस्य लक्षणं लेखनीयम्। द्रव्यं कतिविधम्?

झ) विशेषः कुत्र वर्तते? कानि तावत् नित्यद्रव्याणि?

ञ) आकाशस्य लक्षणं किम्? शरीरान्तःसञ्चारीयवायुः केन नाम्ना अभिहितः भवति?

ट) अभावः कतिविधः? प्रागभावस्य स्वरूपं कथनीयम्।

ठ) स्मृतेः लक्षणं प्रदेयम्? बुद्धिः कुत्र वर्तते?

ड) कर्म कतिविधम्? कानि च तानि?

ढ) करणस्य लक्षणं किम्? उदाहरणमेकं प्रदेयम्।

ण) के तावत् दार्शनिकाः प्रत्यक्षप्रमाणं स्वीकुर्वन्ति? प्रत्यक्षस्य लक्षणं लेखनीयम्।

त) हेत्वाभासशब्दस्य कोऽर्थः? हेत्वाभासः कतिविधः?

थ) असिद्धहेत्वाभासस्य लक्षणमुदाहरणञ्च प्रदेये।

द) समवायस्य लक्षणमालोच्यताम्।

ध) शब्दप्रमाणस्य स्वरूपं गदनीयम्।

2. Answer any **four** of the following questions:

4×5=20

अधोधृतेषु प्रश्नेषु यथेच्छं **चत्वारः** समाधेयाः।

क) भारतीयदर्शनमनुसृत्य देहात्मवादस्य स्वरूपमालोचनीयम्।

ख) तर्कसंग्रहानुसारेण अभावः कतिविधः? अत्यन्ताभावस्य स्वरूपं सोदाहरणमालोचनीयम्।

ग) व्याप्तेर्लक्षणं प्रतिपाद्य अनुमानप्रक्रियायां व्याप्तेर्तात्पर्य पर्यालोचनीयम्।

घ) सन्निकर्षशब्दस्य कोऽर्थः? विशेष्यविशेषणभावसन्निकर्षस्य स्वरूपमालोचनीयम्।

ङ) टीका लेख्या — स्मृति ।

च) व्याख्या कार्या — 'आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतु ।'

छ) हेत्वाभास निरूपणीय (कस्यचन द्वयस्य) ।

i) पर्वतो वह्निमान् प्रमेयत्वात् ।

ii) शब्दो नित्य: कृतकत्वात् ।

iii) गगनारविन्दं सुरभि अरविन्दत्वात् ।

3. Answer any **two** of the following questions. One must be written in Sanskrit Language with Devanagari Script: 2×10=20

अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्नद्वयमुत्तरत तयोरेकमवश्यं संस्कृतेन देवनागरीलिप्या च लेख्यम् ।

क) संक्षेपेण सांख्यसम्मत: सत्कार्यवाद: आलोचनीय: ।

ख) तर्कसंग्रहानुसारेण कारणस्य लक्षणमुल्लिख्य व्याख्येयम् । करणकारणयो: प्रभेद: प्रदर्शनीय: । किं तावत् व्यापारस्य लक्षणम् ।

ग) तर्कसंग्रहानुसारेण सामान्यस्य लक्षणप्रदर्शनपूर्वकं सोदाहरणं पर्यालोचनीयम् ।

घ) भारतीयदर्शने विवर्तवादं के दार्शनिका: स्वीकुर्वन्ति? तस्य स्वरूपं सोदाहरणञ्च आलोचनीयम् ।